# दुर्गा सप्तश्लोकी

ॐ अस्य श्री दुर्गा सप्तश्लोकी स्तोत्र मंत्रस्य नारायण ऋषिः, नाना छंदांसि, श्री महाकाळी महालक्ष्मी महासरस्वत्यो देवताः, श्री दुर्गाप्रीत्यर्थं दुर्गासप्तश्लोकी पाठे विनियोगः

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा / बलादाकृष्य मोहाय महामाया प्रयच्छति // १

दुर्गे स्मृता हरसि भीतिमशेष जंतोः / स्वस्थैः स्मृता मतिमतीव शुभां ददासि /
दारिद्र्य दुःख भयहारिणि का त्वदन्या /सर्वोपकार करणाय सदार्द्र चित्ता // २

सर्व मंगळ मांगळ्ये शिवे सर्वार्थ साधिके / शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते // ३

शरणागत दीनार्त परित्राण परायणे / सर्वस्यार्ति हरे देवि नारायणि नमोस्तु ते // ४

सर्वस्वरूपे सर्वेशे सर्व शक्ति समन्विते / भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते // ५

रोगानशेषानपहंसि तुष्टा / रुष्टा तु कामान् सकलानभीष्टान् /
त्वामाश्रितानां न विपन्नराणां / त्वामाश्रिता ह्याश्रयतां प्रयांति // ६

सर्वा बाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरि / एवमेव त्वया कार्यमस्मद्वैरि विनाशनं // ७